# Markandeyamaharshikritam Jagannatha Stotram

# માર્કણ્ડેયમહર્ષિકૃતં જગન્નાથસ્તોત્રમ્

## Document Information

Text title : Markandeyamaharshikritam Jagannatha Stotram

File name : mArkaNDeyamaharShikRRitaMjagannAthastotram.itx

Category : vishhnu, vishnu, brahmapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : brahmapurANa | adhyAya 55/11-35||

Latest update : September 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 28, 2024

*sanskritdocuments.org*

# માર્કણ્ડેયમહર્ષિકૃતં જગન્નાથસ્તોત્રમ્

માર્કણ્ડેય ઉવાચ ।
દેવદેવ જગન્નાથ માયાબાલવપુર્ધર ।
ત્રાહિ માં ચારુપદ્માક્ષ દુઃખિતં શરણાગતમ્ ॥ ૧૧॥

સન્તપ્તોઽસ્મિ સુરશ્રેષ્ઠ સંવર્તાખ્યેન વહ્નિના ।
અઙ્ગારવર્ષભીતં ચ ત્રાહિ માં પુરુષોત્તમ ॥ ૧૨॥

શોષિતશ્ચ પ્રચણ્ડેન વાયુના જગદામુના ।
વિહ્વલોઽહં તથા શ્રાન્તસ્ત્રાહિ માં પુરુષોત્તમ ॥ ૧૩॥

તાપિતશ્ચ તથામાત્યૈઃ પ્રલયાવર્તકાદિભિઃ ।
ન શાન્તિમધિગચ્છામિ ત્રાહિ માં પુરુષોત્તમ ॥ ૧૪॥

તૃષિતશ્ચ ક્ષુધાઽઽવિષ્ટો દુઃખિતશ્ચ જગત્પતે ।
ત્રાતારં નાત્ર પશ્યામિ ત્રાહિ માં પુરુષોત્તમ ॥ ૧૫॥

અસ્મિન્નેકાર્ણવે ઘોરે વિનષ્ટે સચરાચરે ।
ન ચાન્તમધિગચ્છામિ ત્રાહિ માં પુરુષોત્તમ ॥ ૧૬॥

તવોદરે ચ દેવેશ મયા દૃષ્ટં ચરાચરમ્ ।
વિસ્મિતોઽહં વિષણ્ણશ્ચ ત્રાહિ માં પુરુષોત્તમ ॥ ૧૭॥

સંસારેઽસ્મિન્નિરાલમ્બે પ્રસીદ પુરુષોત્તમ ।
પ્રસીદ વિબુધશ્રેષ્ઠ પ્રસીદ વિબુધપ્રિય ॥ ૧૮॥

પ્રસીદ વિબુધાં નાથ પ્રસીદ વિબુધાલય ।
પ્રસીદ સર્વલોકેશ જગત્કારણકારણ ॥ ૧૯॥

પ્રસીદ સર્વકૃદ્દેવ પ્રસીદ મમ ભૂધર ।
પ્રસીદ સલિલાવાસ પ્રસીદ મધુસૂદન ॥ ૨૦॥

પ્રસીદ કમલાકાન્ત પ્રસીદ ત્રિદશેશ્વર ।

પ્રસીદ કંસકેશિઘ્ન પ્રસીદારિષ્ટનાશન ॥ ૨૧॥

પ્રસીદ કૃષ્ણ દૈત્યઘ્ન પ્રસીદ દનુજાન્તક ।
પ્રસીદ મથુરાવાસ પ્રસીદ યદુનન્દન ॥ ૨૨॥

પ્રસીદ શક્રાવરજ પ્રસીદ વરદાવ્યય ।
ત્વં બુદ્ધિઃ પ્રકૃતિશ્ચૈવ સત્ત્વાદ્યાસ્ત્વં જગત્પતે ॥ ૨૩॥

ત્વં નભસ્ત્વં મનશ્ચૈવ ત્વમહઙ્કાર એવ ચ ।
ત્વં બુદ્ધિઃ પ્રકૃતિશ્ચૈવ સત્ત્વાદ્યાસ્ત્વં જગત્પતે ॥ ૨૪॥

પુરષસ્ત્વં જગદ્વ્યાપી પુરુષાદપિ ચોત્તમઃ ।
ત્વમિન્દ્રિયાણિ સર્વાણિ શબ્દાદ્યા વિષયાઃ પ્રભો ॥ ૨૫॥

ત્વં દિક્પાલાશ્ચ ધર્માશ્ચ વેદા યજ્ઞાઃ સદક્ષિણાઃ ।
ત્વમિન્દ્રસ્ત્વં શિવો દેવસ્ત્વં હવિસ્ત્વં હુતાશનઃ ॥ ૨૬॥

ત્વં યમઃ પિતૃરાડ્દેવ ત્વં રક્ષોધિપતિઃ સ્વયમ્ ।
વરુણસ્ત્વમપાં નાથ ત્વં વાયુસ્ત્વં ધનેશ્વરાઃ ॥ ૨૭॥

ત્વમીશાનસ્ત્વમનન્તસ્ત્વં ગણેશશ્ચ ષણ્મુખઃ ।
વસવસ્ત્વં તથા રુદ્રાસ્ત્વમાદિત્યાશ્ચ ખેચરાઃ ॥ ૨૮॥

દાનવાસ્ત્વં તથા યક્ષાસ્ત્વં દૈત્યાઃ સમરુદ્ગણાઃ ।
સિદ્ધાશ્ચાપ્સરસો નાગા ગન્ધર્વાસ્ત્વં સ ચારણાઃ ॥ ૨૯॥

પિતરો બાલખિલ્યાશ્ચ પ્રજાનાં પતયોઽચ્યુત ।
મુનયસ્ત્વમૃષિગણાસ્ત્વમશ્વિનૌ નિશાચરાઃ ॥ ૩૦॥

અન્યાશ્ચ જાતયસ્ત્વં હિ યત્કિઞ્ચિજ્જીવસંજ્ઞિતમ્ ।
કિં ચાત્ર બહુનોક્તેન બ્રહ્માદિસ્તમ્બગોચરમ્ ॥ ૩૧॥

ભૂતં ભવ્યં ભવિષ્યં ચ ત્વં જગત્સચરાચરમ્ ।
યત્તે રૂપં પરં દેવ કૂટસ્થમચલં ધ્રુવમ્ ॥ ૩૨॥

બ્રહ્માદ્યાસ્તન્ન જાનન્તિ કથમન્યેઽલ્પમેધસઃ ।
દેવ શુદ્ધસ્વભાવોઽસિ નિત્યસ્ત્વં પ્રકૃતેઃ પરઃ ॥ ૩૩॥

અવ્યક્તઃ શાશ્વતોઽનન્તઃ સર્વવ્યાપી મહેશ્વરઃ ।
ત્વમાકાશઃ પરઃ શાન્તો અજસ્ત્વં વિભુરવ્યયઃ ॥ ૩૪॥

એવં ત્વાં નિર્ગુણં સ્તોતું કઃ શક્નોતિ નિરઞ્જનમ્ ।
સ્તુતોઽસિ યન્મયા દેવ વિકલેનાલ્પચેતસા ।
તત્સર્વં દેવદેવેશ ક્ષન્તુમર્હસિ ચાવ્યય ॥ ૩૫॥

ઇતિ બ્રહ્મપુરાણે પઞ્ચપઞ્ચાશત્તમાધ્યાયાન્તર્ગતં
ભગવત્સ્તવનિરૂપણં નામ જગન્નાથસ્તોત્રં સમાપ્તમ્ ।

બ્રહ્મપુરાણ । અધ્યાય ૫૫/૧૧-૩૫॥

brahmapurANa . adhyAya 55/11-35..

Proofread by PSA Easwaran

*Markandeyamaharshikritam Jagannatha Stotram*
pdf was typeset on September 28, 2024

Please send corrections to *sanskrit@cheerful.com*